.. maNkigItA ..

# ॥ मङ्किगीता ॥

अध्यायः १७१

युधिस्थिर

ईहमानः समारम्भान्यदि नासादयेद्धनम् ।
धनतृष्णाभिभूतश्च किं कुर्वन्सुखमाप्नुयात् ॥ १॥

भीष्म

सर्वसाम्यमनायासः सत्यवाक्यं च भारत ।
निर्वेदश्चाविवित्सा च यस्य स्यात्स सुखी नरः ॥ २॥
एतान्येव पदान्याहुः पञ्च वृद्धाः प्रशान्तये ।
एष स्वर्गश्च धर्मश्च सुखं चानुत्तमं सताम् ॥ ३॥
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
निर्वेदान्मङ्किना गीतं तन्निबोध युधिष्ठिर ॥ ४॥
ईहमानो धनं मङ्किर्भग्नेहश्च पुनः पुनः ।
केन चिद्धनशेषेण क्रीतवान्दम्य गोयुगम् ॥ ५॥
सुसम्बद्धौ तु तौ दम्यौ दमनायाभिनिःसृतौ ।
आसीनमुष्ट्रं मध्येन सहसैवाभ्यधावताम् ॥ ६॥
तयोः सम्प्राप्तयोरुष्ट्रः स्कन्धदेशममर्षणः ।
उत्थायोत्क्षिप्य तौ दम्यौ प्रससार महाजवः ॥ ७॥
ह्रियमाणौ तु तौ दम्यौ तेनोष्ट्रेण प्रमाथिना ।
म्रियमाणौ च सम्प्रेक्ष्य मङ्किस्तत्राब्रवीदिदम् ॥ ८॥
न चैवाविहितं शक्यं दक्षेणापीहितुं धनम् ।
युक्तेन श्रद्धया सम्यगीहां समनुतिष्ठता ॥ ९॥
कृतस्य पूर्वं चानर्थैर्युक्तस्याप्यनुतिष्ठतः ।
इमं पश्यत सङ्गत्या मम दैवमुपप्लवम् ॥ १०॥
उद्यम्योद्यम्य मे दम्यौ विषमेनेव गच्छति ।
उत्क्षिप्य काकतालीयमुन्माथेनेव जम्बुकः ॥ ११॥
मनी वोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम ।
शुद्धं हि दैवमेवेदमतो नैवास्ति पौरुषम् ॥ १२॥
यदि वाप्युपपद्येत पौरुषं नाम कर्हि चित् ।
अन्विष्यमाणं तदपि दैवमेवावतिष्ठते ॥ १३॥
तस्मान्निर्वेद एवेह गन्तव्यः सुखमीप्सता ।
सुखं स्वपिति निर्विण्णो निराशश्चार्थसाधने ॥ १४॥
अहो सम्यक्शुकेनोक्तं सर्वतः परिमुच्यता ।

प्रतिष्ठता महारण्यं जनकस्य निवेशनात् ॥ १५ ॥
यः कामान्प्राप्नुयात्सर्वान्यश्चैनान्केवलांस्त्यजेत् ।
प्रापनात्सर्वकामानां परित्यागो विशिष्यते ॥ १६ ॥
नान्तं सर्वविवित्सानां गतपूर्वोऽस्ति कश् चन ।
शरीरे जीविते चैव तृष्णा मन्दस्य वर्धते ॥ १७ ॥
निवर्तस्व विवित्साभ्यः शाम्य निर्विद्य मामक ।
असकृच्चासि निकृतो न च निर्विद्यसे तनो ॥ १८ ॥
यदि नाहं विनाश्यस्ते यद्येवं रमसे मया ।
मा मां योजय लोभेन वृथा त्वं वित्तकामुक ॥ १९ ॥
सञ्चितं सञ्चितं द्रव्यं नष्टं तव पुनः पुनः ।
कदा विमोक्ष्यसे मूढ धनेहां धनकामुक ॥ २० ॥
अहो नु मम बालिश्यं योऽहं क्रीदनकस्तव ।
किं नैव जातु पुरुषः परेषां प्रेष्यतामियात् ॥ २१ ॥
न पूर्वे नापरे जातु कामानामन्तमाप्नुवन् ।
त्यक्त्वा सर्वसमारम्भान्प्रतिबुद्धोऽस्मि जागृमि ॥ २२ ॥
नूनं ते हृदयं कामवज्र सारमयं दृधम् ।
यदनर्थशताविष्टं शतधा न विदीर्यते ॥ २३ ॥
त्यजामि कामत्वां चैव यच्च किं चित्प्रियं तव ।
तवाहं सुखमन्विच्छन्नात्मन्युपलभे सुखम् ॥ २४ ॥
कामजानामि ते मूलं सङ्कल्पात्किल जायसे ।
न त्वां सङ्कल्पयिष्यामि समूलो न भविष्यति ॥ २५ ॥
ईहा धनस्य न सुखा लब्ध्वा चिन्ता च भूयसी ।
लब्धानाशो यथा मृत्युर्लब्धं भवति वा न वा ॥ २६ ॥
परेत्य यो न लभते ततो दुःखतरं नु किम् ।
न च तुष्यति लब्धेन भूय एव च मार्गति ॥ २७ ॥
अनुतर्षुल एवार्थः स्वादु गाङ्गमिवोदकम् ।
मद्विलापनमेतत्तु प्रतिबुद्धोऽस्मि सन्त्यज ॥ २८ ॥
य इमं मामकं देहं भूतग्रामः समाश्रितः ।
स यात्वितो यथाकामं वसतां वा यथासुखम् ॥ २९ ॥
न युष्मास्विह मे प्रीतिः कामलोभानुसारिषु ।
तस्मादुत्सृज्य सर्वान्वः सत्यमेवाश्रयाम्यहम् ॥ ३० ॥
सर्वभूतान्यहं देहे पश्यन्मनसि चात्मनः ।
योगे बुद्धिं श्रुते सत्त्वं मनो ब्रह्मणि धारयन् ॥ ३१ ॥
विहरिष्याम्यनासक्तः सुखी लोकान्निरामयः ।
यथा मा त्वं पुनर्नैवं दुःखेषु प्रनिधास्यसि ॥ ३२ ॥
त्वया हि मे प्रनुन्नस्य गतिरन्या न विद्यते ।

तृष्णा शोकश्रमाणां हि त्वं कामप्रभवः सदा ॥ ३३॥
धननाशोऽधिकं दुःखं मन्ये सर्वमहत्तरम् ।
ज्ञातयो ह्यवमन्यन्ते मित्राणि च धनच्युतम् ॥ ३४॥
अवज्ञान सहस्रैस्तु दोषाः कस्ततराधने ।
धने सुखकला या च सापि दुःखैर्विधीयते ॥ ३५॥
धनमस्येति पुरुषं पुरा निघ्नन्ति दस्यवः ।
क्लिश्यन्ति विविधैर्दन्दैर्नित्यमुद्वेजयन्ति च ॥ ३६॥
मन्दलोलुपता दुःखमिति बुद्धिं चिरान्मया ।
यद्यदालम्बसे कामतत्तदेवानुरुध्यसे ॥ ३७॥
अतत्त्वज्ञोऽसि बालश्च दुस्तोषोऽपूरणोऽनलः ।
नैव त्वं वेत्थ सुलभं नैव त्वं वेत्थ दुर्लभम् ॥ ३८॥
पातालमिव दुष्पूरो मां दुःखैर्योक्तुमिच्छसि ।
नाहमद्य समावेष्टुं शक्यः कामपुनस्त्वया ॥ ३९॥
निर्वेदमहमासाद्य द्रव्यनाशाद्यदृच्छया ।
निर्वृतिं परमां प्राप्य नाद्य कामान्विचिन्तये ॥ ४०॥
अतिक्लेशान्सहामीह नाहं बुध्याम्यबुद्धिमान् ।
निकृतो धननाशेन शये सर्वाङ्गविज्वरः ॥ ४१॥
परित्यजामि कामत्वां हित्वा सर्वमनोगतीः ।
न त्वं मया पुनः कामनस्योतेनेव रंस्यसे ॥ ४२॥
क्षमिष्येऽक्षममाणानां न हिंसिष्ये च हिंसितः ।
द्वेष्य मुक्तः प्रियं वक्ष्याम्यनादृत्य तदप्रियम् ॥ ४३॥
तृप्तः स्वस्थेन्द्रियो नित्यं यथा लब्धेन वर्तयन् ।
न सकामं करिष्यामि त्वामहं शत्रुमात्मनः ॥ ४४॥
निर्वेदं निर्वृतिं तृप्तिं शान्तिं सत्यं दमं क्षमाम् ।
सर्वभूतदयां चैव विद्धि मां शरणागतम् ॥ ४५॥
तस्मात्कामश्च लोभश्च तृष्णा कार्पण्यमेव च ।
त्यजन्तु मां प्रतिष्ठन्तं सत्त्वस्थो ह्यस्मि साम्प्रतम् ॥ ४६॥
प्रहाय कामं लोभं च क्रोधं पारुष्यमेव च ।
नाद्य लोभवशं प्राप्तो दुःखं प्राप्स्याम्यनात्मवान् ॥ ४७॥
यद्यत्त्यजति कामानां तत्सुखस्याभिपूर्यते ।
कामस्य वशगो नित्यं दुःखमेव प्रपद्यते ॥ ४८॥
कामान्व्युदस्य धुनुते यत्किं चित्पुरुषो रजः ।
कामक्रोधोद्भवं दुःखमह्रीररतिरेव च ॥ ४९॥
एष ब्रह्म प्रविष्टोऽहं ग्रीस्मे शीतमिव ह्रदम् ।
शाम्यामि परिनिर्वामि सुखमासे च केवलम् ॥ ५०॥
यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।

तृष्णा क्षयसुखस्यैते नार्हतः सोदशीं कलाम् ॥ ५१॥
आत्मना सप्तमं कामं हत्वा शत्रुमिवोत्तमम् ।
प्राप्यावध्यं ब्रह्म पुरं राजेव स्यामहं सुखी ॥ ५२॥
एतां बुद्धिं समास्थाय मङ्किर्निर्वेदमागतः ।
सर्वान्कामान्परित्यज्य प्राप्य ब्रह्म महत्सुखम् ॥ ५३॥
दम्य नाश कृते मङ्किरमरत्वं किलागमत् ।
अछिनत्काममूलं स तेन प्राप महत्सुखम् ॥ ५४॥

॥ इति मङ्किगीता समाप्ता ॥

Adhyaya number 177 in shAntiparva, Mahabharata critical edition
(Bhandarkar Oriental Research Institute BORI).
In Kinjavadekar's edition it is 171.

Sunder Hattangadi (sunderh at hotmail.com)

---

Please send corrections to sanskrit@cheerful.com
Last updated October 3, 2010
http://sanskritdocuments.org